दिनाङ्क :- 07.06.2025

प्रात: - 06:55

प्रधानमंत्री

प्रधानमन्त्री मोदी उक्तवान् यत् रेलसम्पर्कः काश्मीरतः कन्याकुमारीपर्यन्तं देशं सम्बध्दयति। प्रधानमन्त्रिणा नरेन्द्रमोदिना जम्मू-कश्मीरे ४६ षट् चत्वारिंशत् सहस्राधिक कोटि रूप्यकान्वितानां अनेकानां विकासपरियोजनानां शिलान्यासः, उद्घाटनं, समर्पणं च कृतम्। श्री मोदी विश्वस्य सर्वोच्चं रेलवे मेहराबसेतोः - चेनाब सेतोः तथा भारतस्य प्रथम- केबल-स्टेड् रेलसेतोः - अञ्जी खड् सेतोः उद्घाटनं कृतवान्। प्रायः ४४ चतुष्चत्वारिंशत् सहस्रकोटिरूप्यकाणां व्ययेन निर्मितस्य उधमपुर-श्रीनगर-बारामुल्ला-रेललिङ्कं इति। (USBRL) अपि राष्ट्राय समर्पितवान् । इदानीं काश्मीरतः कन्याकुमारीपर्यन्तं देशः रेलसम्पर्केण सम्बद्धः इति सः प्रसन्नतां प्रकटितवान् । श्री मोदी उक्तवान् यत् उधमपुर-श्रीनगर-बारामुल्ला रेलरेखा परियोजना नूतनस्य, सशक्तस्य जम्मू-कश्मीरस्य प्रतीका, वेन वर्धमानस्य भारतस्य सामर्थ्यस्य च महती घोषणा अस्ति। सः चेनाब-अञ्जी-सेतूम् जम्मू-कश्मीरस्य समृद्धेः द्वारं भविष्यति इति प्रतिपादितवान्। जम्मू-कश्मीर-यात्राकाले प्रधानमन्त्री वन्दे-भारत-एक्सप्रेस्-रेलयानद्वयमपि ध्वजं प्रदर्शितवान्। प्रधानमन्त्रिणा कटरानगरे ३५० सार्धत्रिंशतकोटिरूप्यकाणां व्ययेन श्री माता वैष्णोदेवी चिकित्सा संस्थानस्य शिलान्यासः अपि कृतः ।

प्रधमनमन्त्री/ जी सप्त

प्रधानमन्त्री नरेन्द्रमोदी अस्य मासस्य अन्ते कनाडादेशे जी-सप्तम शिखरसम्मेलने भागं गृहीष्यति। ह्यः मोदीमहोदयस्य समीपे कनाडादेशस्य प्रधानमन्त्रिणः मार्क कार्नी महोदयस्य दूरभाष: प्राप्तः। सामाजिक अन्तर्जालपटले प्रधानमन्त्री मोदी कार्नीमहोदयाय निर्वाचने विजयस्य अभिनन्दनं कृतवान्, तथा च कनानास्कीस नगरे जी-७ सप्तमं शिखरसम्मेलने आमन्त्रयितुं धन्यवादं दत्तवान्। प्रधानमन्त्रिणा उक्तं यत् सः शिखरसम्मेलने कनाडादेशस्य प्रधानमन्त्रिणा सह मेलितुं उत्सुकः अस्ति।

प्रधानमंत्री- मध्य एशिया

मध्य एशिया देशैः सह भारतस्य संबंधाः सदैव प्राथमिकातां भजन्ते। प्रधानमन्त्रिणा नरेन्द्र मोदिना ह्यः नवदिल्ल्यां कजागिस्तान-कीर्गिज-गणराज्य-तुर्कमेनिस्तान-उज्बेकिस्तान देशानां विदेशमन्त्रिभिः सह संयुक्तोपवेशने एषा वार्ता कृता। मध्य एशिया-देशानां विदेशमन्त्रिभिः पहलगाम-आतंकाक्रमणं कटुतया निन्दितम्। अधिसीमं आतंकवादस्य विरोधे भारतस्य संघर्षे समर्थनम् प्रकटितम्।

निर्वाचन/ बाङ्गलादेशस्य

बाङ्गलादेशस्य अन्तरिमनेता मुहम्मद युनुस् आगामिनि वर्षे निर्वाचनस्य घोषणां कृतवान्। बाङ्गलादेशस्य अन्तरिमसर्वकारस्य परामर्शदात्रा डॉ. मुहम्मद युनुसेन घोषितं यत् देशस्य अग्रिमः राष्ट्रियनिर्वाचनः आगामिनि वर्षे एप्रिलमासस्य प्रथमपक्षे भविष्यति।

ब्रिक्स

दश ब्रिक्स देशानां संसद्भिः पहलगाम-आतंकाक्रमणं निन्दितम्। आतंकवादः न सहिष्यते इति नीतौ सहयोगे सहमतिः प्रकटिता । लोकसभा-अध्यक्षः ओम बिरला अस्य मासस्य चतुर्थ-पञ्च दिनाङ्कयोः ब्राजीलस्य ब्रासीलियायां एकादशे ब्रिक्स संसदीय मंचे भारतीय-प्रतिनिधि मण्डलस्य नेतृत्वम् कृतवान्।

Axiom-4

Axiom-4 इत्यस्मिन् अन्तरिक्षयात्रायै चयनितः भारतीयः विमानाचालकः ।इस्रो-सङ्घस्य गगनयान-अभियानस्य कृते चयनितः भारतीय-वायुसेनायाः परीक्षण-विमानचालकः समूहस्य कप्तानः शुभंशुशुक्लः। अन्येषु बहुराष्ट्रीय-अन्तरिक्षयात्रिषु असौ अन्यतमः भविष्यति, येषां प्रक्षेपणं अमेरिकी-अन्तरिक्ष-संस्थायाः नासा-द्वारा १०दश जून-दिनाङ्के एक्सियम-चतुर्-मिशनस्य अन्तर्गतं अन्तर्राष्ट्रीय-अन्तरिक्षकेन्द्रं प्रति प्रक्षेपणं भविष्यति।

राष्ट्रपतिः मुर्मूः

राष्ट्रपति: मुर्मू: ईद-उल-अजहा पर्वणः अभिवादनं कुर्वती वदति- 'अस्माभिः मिलित्वा उत्तमसमाजस्य निर्माणं करणीयम्' इति। तस्याः कार्यालयात् प्रकाशितस्य वक्तव्यस्य अनुसारेण राष्ट्रपतिना उक्तं यत् एषः उत्सवः त्यागस्य, आस्थायाः, मानवीयमूल्यानां च प्रतीकम् अस्ति। लोकसभा अध्यक्षः ईद-उल-जुहा-दिनस्य पूर्वसंध्यायां देशवासिभ्यः शुभकामनाः दत्तवान्। श्री बिर्ला स्वसन्देशे उक्तवान् "ईद-उज़-जुहा-उत्सवस्य सर्वेभ्यः अभिवादनं शुभकामनाश्च ददामि। अहं कामये यत् एषः शुभः अवसरः आनन्दं, समृद्धिं, सौहार्दं च आनयतु।

संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

क्रिकेट

इण्डिया ए तथा इङ्ग्लैण्ड् लायन्स् इत्येतयोः मध्ये द्वितीयः टेस्ट् पञ्चदिवसीया क्रीडा नॉर्थम्प्टन-नगरस्य काउण्टी-क्रीडाङ्गणे भवति । प्रथमदिनम् सम्पन्नम् । प्रथमदिवसस्य क्रीडायाः अन्ते इण्डिया ए इत्यनेन त्र्यशीति कन्दुक प्रक्षेपचक्रेषु सप्तक्रीडकाणां पुरस्सरम् ७- ३१९ नवनवत्यधिक त्रिशतं धावनान्काः अर्जिताः ।

शतरंज

मैग्नस कार्लसन: अद्य स्टावेजरे सप्तम: नॉर्वे शतरंज पुरस्कार विजितवान्।

फ्रेंच

फ्रेंच ओपन पुरुषैकल स्पर्धायां जैनिक सिनर: द्वितीय-उपान्त्यचक्रे नोवाक-जाकोविचम् पराजित्य अन्त्यचक्रे प्राविशत्। अल्काराज: मुसेट्टी पराजित्य अन्त्यचक्रे प्राविशत्।